# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-6)** **प्रश्नपत्रम् – 6** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C.C.3.6.12** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –04/04/2019 सन्दर्भग्रन्थः – मनुस्मृतिः - मन्वर्थटीकासहिता (11,12 अध्यायौ)

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 अधोलिखितेषु द्वयोः ससन्दर्भान्वयप्रसङ्गपूर्वकं व्याख्या विधेया। 10**

(1) यो साधुभ्योऽर्थमादाय साधुभ्यः सम्प्रयच्छति।
स कृत्वा प्लवमात्मानं सन्तारयति तावुभौ॥

(2) पुण्यान्यन्यानि कुर्वित श्रद्धानो जितेन्द्रियः।
न स्वल्पदक्षिणैर्यज्ञैर्यजेतेह कथञ्चन।

(3) प्रत्यक्षं चानुमानञ्च शास्त्रञ्च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सिता॥

**प्रश्नः-2 कस्याप्येकस्य सविस्तरमुत्तरं लिखत। 10**

(1) पञ्चमहापातकानां मनूक्तदिशा सविस्तृतवर्णनं कुरुत।

(2) सुरापान सुवर्णस्तेय गोवधादि कर्मणां प्रायश्चित्तानि वर्णयत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 अधोलिखितेषु द्वयोः श्लोकयोः ससन्दर्भपुर्वकं भावार्थो लेख्यः। 10**

(1) फलदानाञ्च वृक्षाणां छेदने जप्यमृक् शतम्।
गुल्म वल्ली लतानाञ्च पुष्पितानाञ्च वीरूधाम्॥

(2) अज्ञानात् वारूणीं पीत्वा संस्कारेणैव शुद्ध्यति।
मतिपूर्वमनिर्देश्य प्राणान्तिकमिति स्थितिः॥

(3) मनुष्याणां च हरणे स्त्रीणां क्षेत्रगृहस्य च।
कूपवापीजलानाञ्च शुद्धिश्चान्द्रायणं स्मृतम्॥

**प्रश्नः-4 कस्याप्येकस्य सविस्तरमुत्तरं यच्छत्। 10**

(1) मनूक्तदिशा दानव्यवस्था सारांशरूपेण वर्णयत।

(2) मनुस्मृत्यनुसारं विविधकर्मणां प्रायश्चित्तानि वर्णयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः श्लोकयोः ससन्दर्भ अर्थविस्तारं कुरुत। 10**

(1) शुभाशुभफलं कर्म मनोवाग्देहसम्भवम्।
कर्मजा गतयो नृणामुत्तमाऽधममध्यमाः ॥

(2) चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
भूतं भव्यं भविष्यञ्च सर्वं वेदात् प्रसिद्धयति ॥

(3) देवत्वं सात्विका यान्ति मनुष्यत्वञ्च राजसाः।
तिर्थक्त्वं तामसा नित्यं इत्येषा त्रिविधा गतिः ॥

**प्रश्नः-6 एकस्य सविस्तरमुत्तरं यच्छत। 10**

(1) मनुस्मृत्याधारेण कर्मफलम्।

(2) मोक्षफलककर्माणि।

### अन्वितयः १-३

**प्रश्नः-7 दशानां लघुत्तरेण लिखत। 10**

(1) मनुस्मृतौ कति अध्यायाः सन्ति?

(2) एकादशाध्याये कति श्लोकाः सन्ति?

(3) द्वादशाध्याये कति श्लोकाः सन्ति?

(4) मोक्षफलककर्माणि कस्मिन्नध्याये उक्तानि?

(5) दानव्यवस्था कस्मिन्नध्याये उक्ता?

(6) सुगन्धाघ्राणे किं प्रायश्चित्तम्? ब्राह्मणस्य।

(7) अज्ञेभ्यः के श्रेष्ठाः?

(8) ग्रन्थिभ्यः के श्रेष्ठाः?

(9) धारिभ्यो के श्रेष्ठाः?

(10) ज्ञानिभ्यो के श्रेष्ठाः?

(11) ब्राह्मणानां कृते उत्तम मोक्षसाधनं किम्?

(12) सर्वेषां शरीरिणां कर्मयोगे कः जनयति?

(13) 'खं' इत्युक्ते कः बोधः?

(14) 'श्रुति' शब्दस्य कोऽर्थः?

(15) 'धर्म' शब्दस्य का व्याख्या?